श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ सद्भावैभवस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सद्मवैभवस्तबकः ॥

अरविन्दवनं वन्दे तदहं यदहर्निशम्।
प्रीतिपूर्वकमध्यास्ते पीताम्बरकुटुम्बिनी॥ १ ॥

सारसात्मनि तवाम्ब मन्दिरे द्वारपालकजना इवेन्दिरे।
चारुकेसरसुवर्णयष्टिकाधारिणः प्रतिवसन्ति षट्पदाः॥ २ ॥

तावकं पदमभिख्यया रमे वारिजं प्रणिगदन्ति सूरयः।
प्रौढशोभनखरांशुवैभवप्राप्तमञ्जिम सदालिसेवितम्॥ ३ ॥

प्रबिभ्रति भवत्पदप्रणयतद्विपर्यासयोः
  जना विभवदुर्गती जननि तत्र चोदाहृतिः।
सहस्रवसुरेधते सरसिजानुकूले रविः
  स भिक्षुकशिरोमणिः श्रयति तत्प्रतीपः क्षयम्॥ ४ ॥

कपटकिटिदशायां कैटभारिः क्षमाभाक्
  प्रभुरकृत यतोऽसौ पङ्कजाते निवासम्।
तदिह भजसि भर्तुर्धर्ममेवानुसर्तुं
  परमपुरुषकान्ते पङ्कजातस्थितिं किम्॥ ५ ॥

स्थानं समस्तवसुवृद्धिपुषस्तवापि
  पद्मं रमे नवसुमत्वमुपैति चित्रम्।
अप्यन्यदद्भुतममुष्य तु योऽनुकूलः
  शश्वद्बिभर्ति वसुमत्त्वमसौ पतङ्गः॥ ६ ॥

सन्मानसोल्लसनदः सदसद्विवेके
  शक्तः सरोजनिलये सदनं त्वदीयम्।
शब्दैः शुभैः श्रुतिपथं सुखयन् गभीरैः
  संसेवते जननि हंसगणोऽवदातः॥ ७ ॥

कमले कमलेषु सन्निधत्से सकलेषु स्ववशेषु विष्टपेषु।
सहजं जननीजनस्य लोके जलजातेषु विशेषवत्सलत्वम्॥ ८ ॥

कल्हारोत्पलकैरवादिषु तथा कल्याणि माल्यादिषु
    प्रायः सत्सु सुमेषु वस्तुषु परं पद्मानि सद्मानि ते।
भाग्यं कुत्रचिदेव नृत्यतितरां भूयःसु तुल्येष्वपि
    त्वत्कान्ताय सुगन्धिवस्तुषु तुलस्येकैव सा रोचते॥ ९ ॥

त्वद्गेहं कमलं यतस्त्वदविनाभूतस्य विष्णोः पदं
    सूर्यालोकविकासमञ्चति ततः पद्मे मधुस्वादु तत्।
अन्नादोऽहमितीव गीतिनिनदैः श्रुत्यन्तसञ्चारिभिः
    कृष्णाकारजुषोऽत्र केचिदनिशं नन्दन्ति लब्ध्वा रसम्॥ १० ॥

सूर्यालोकदशासु हर्षमयते दोषाकरालोकने
    सङ्कोचं भजति श्रितालिषु रमे दत्ते परं जीवनम्।
स्थानं पङ्कमधः करोति वहते नालीकशब्दं च ते
    कां वा तावकसन्निधानमहिमा कुर्यान्नचर्यां शुभाम्॥ ११ ॥

धत्ते सदैव शिरसा तव पादरेणून्
    पद्मो बिभर्ति तव नाम च पद्ममेतत्।
वर्वर्ति धारकतया तव हस्तमेव
    तद्युक्तमृच्छति तवोज्ज्वलदास्यलक्ष्मीम्॥ १२ ॥

प्रातः कृताप्लवविधिः पयसां निधाने
    ब्रध्नोऽर्चकः शुचिकरो भृततप्तचक्रः।
उद्घाटयत्युदितविष्णुपदैकसक्तिः
    विश्वाम्ब पद्ममयसद्मदलान्तरं ते॥ १३ ॥

ब्रह्मा यस्मादजनि वहते चारु पीतांशुकं यत्
    सान्द्रामोदं सततममृतस्थानमेवाश्रितं च।
अर्हत्यब्जं तव पदमिदं श्रीनिवासाभिधानं
    मातर्दोषो न भवति मधुस्निग्धता धर्मभूम्नि॥ १४ ॥

अहो मुकुन्दसुन्दरि त्वदीयमन्दिराहितः
स्वयं क्षयं व्रजन्नयं स्वरक्षिणं क्षिणोत्यपि।
सरोरुहद्रुहः शिवः शिरोऽधिरोहदुष्कृताद्
विदिक्षु दिक्षु भिक्षुकः स्फुटं नटन्नटाट्यते॥ १५॥

त्वद्धाम्नः सरसीरुहस्य च मिथस्त्वत्कान्तधामात्मनो
मार्तण्डस्य च पुण्डरीकनिलये मैत्री निसर्गोदिता।
कल्याणी युवयोरियं विवृणुते कैमुत्यनीत्या मिथः
प्रीतिं कामपि भूयसीमविदिता क्षेपामनौपाधिकीम्॥ १६॥

कति न कुसुमंमन्यान्यन्यानि देवि वने वने
न हि समुदितेष्वप्येतेषु क्षमा कमलोपमा।
भगवति भवत्सान्निध्येन प्रभोः कमलानि यत्
करचरणदृक्कल्पानीति स्थिरं दधते यशः॥ १७॥

हरेः करस्पर्शनतः प्रहृष्टा पयस्युदीता रुचिरालिकान्ता।
वाराशिकन्ये वसतिस्त्वदीया बिभर्ति युक्तं कमलाभिधानम्॥ १८॥

भृङ्गीसङ्गीत्युदयसुभगं मञ्जुकिञ्जल्कपुञ्ज
स्फारस्तम्भं किमपि विकसत्पत्रसच्चित्रभित्तिः।
पर्याश्लिष्टं विमलसरसा कर्णिकास्वर्णपीठं
पद्मं विद्मः परमनुगुणं सद्म पद्मे भवत्याः॥ १९॥

दुग्धाम्बुराशिदुहितुस्तव सन्निधानात्
स्वर्णस्थितिर्भवति हन्त कुशेशयस्य।
तत्सम्भवोऽप्यभवदम्ब हिरण्यगर्भो
धन्याः खलु त्वदनुबन्ध्यनुबन्धिनोऽपि॥ २०॥

नवसारसवासमाचरन्त्यास्तव साधर्म्यमिवाम्ब लब्धुकामः।
परमः पुरुषः सदा विधत्ते पुरमध्यस्थितपुण्डरीकवासम्॥ २१॥

अस्ति ते हरिपुरन्ध्रि नीरजस्थानमित्युदितमास्पदद्वयम्।
एकमाहुरिह तु त्रिपात्पदं देवि षट्पदपदं परं पुनः॥ २२॥

सुरादिजीवैरमृतैकनिष्ठैश्चिराय यैरम्ब विभाव्यसेऽन्तः।
आलोकमग्र्यं हरिरेषु तन्वन्नामोदमन्यादृशमादधाति॥ २३ ॥

आदौ दधानं कमलाभिधानमम्भश्च पद्मं च समं तवास्ताम्।
आद्यस्य पुंसः पदमाहुराद्यं वासं द्वितीयं जननि त्वदीयम्॥ २४ ॥

क्षमास्वर्णस्फूर्तिं सततमधिगम्यापि कमले
गुणादाढ्याच्छन्दं कमपि भजते नालमिति यतः।
तदेवालङ्कारं नयति नलिनं स्पर्शनवशात्
तनोति ह्यौदार्यं तव जननि सान्निध्यमहिमा॥ २५ ॥

भगवति परब्रह्माद्वैतप्रसङ्गजुषस्तव
प्रथयति लसद्धर्मालीकत्वमत्र हि दर्शनम्।
त्वमुचितमधिष्ठानं नालीकमाश्रयसे ततः
तव किल सदालोकः सर्वोऽपि कल्पनगो रमे॥ २६ ॥

यत्रोत्तमस्फुरणयन्त्रितचित्तवृत्तौ नित्योल्लसद्रजसि राजति सारसत्वम्।
स्थानं प्रधानमिदमब्धिसुते यतस्ते स्थाने तदत्र रमते महदादितत्त्वम्॥ २७ ॥

सिंहासनस्थितिजुषस्तव वासयोग्यं नित्यं भवेयमिति निश्चयमेत्य नूनम्।
केसर्यभूत् सरसिजं नरसिंहकान्ते तद्द्वेषमेष तनुते तत एव पद्मः॥ २८ ॥

अब्जं विधौ द्विषति देव्यमृतैकवृत्ति कामेन हन्त यदनीयत मार्गणत्वम्।
तस्य स्वतोऽम्बरमणिस्फुटवस्ववाप्तिः उल्लासहेतुरभवत्तव सन्निधानात्॥ २९ ॥

उत्फुल्लवारिरुहतल्लजकेलिगेहे सर्वेश्वरस्य दयितां शयितां ननु त्वाम्।
वैतालिका इव गृहीतसुजातगीताः प्रातः शनैर्मधुकराः प्रतिबोधयन्ति॥ ३० ॥

सहंसकासारबहूर्मिकोज्ज्वला पयोजराजिः प्रतिपन्नकर्णिका।
सहस्रवस्वाप्तित एधते रमे श्रियः श्रयन्ते ह्यखिलास्त्वदाश्रयम्॥ ३१ ॥

स ते निवासः शयनीकृतो वा नाथेन नित्यं नयनीकृतो वा।
फणैः सहस्रेण वृतो दलैर्वा शेते बिले वा कमले कुशे वा॥ ३२ ॥

श्रीसूक्तं ते जननि नलिनं स्थानमाख्याति मुख्यं
दृष्टान्तं त्वत्प्रियतमदृशोरन्तरादित्यविद्या।
जन्मस्थानं तव तनुभुवो धातुराथर्वणादि
त्वत्सान्निध्यात् क्वच न भवति श्रीरनिम्ना महिम्नाम्॥ ३३ ॥

शैवालकान्तरगतं तव सद्म विद्मः सारङ्गलाञ्छितवपुर्मिलितामृतौघम्।
पूष्णा च दत्तरुचि पुंसि नपुंसके च ख्यातस्य मातरिदमब्जपदस्य वाच्यम्॥ ३४ ॥

कान्तः पदत्रयमितस्थलयाचकस्ते
त्वं त्वम्ब षड्पदमिते निलये निविष्टा।
स्थानान्यथापि विपुलानि समाश्रितानां
चित्रं युवां कलयथश्चिरमुच्छ्रितानि॥ ३५ ॥

त्वत्पादपङ्कजरजः कणधन्यधन्येष्वम्भोरुहेषु वसतामलिपोतकानाम्।
वर्गेषु हन्त जननं वलशासनाद्या वाञ्छन्ति किं पुनरमी वयमब्धिकन्ये॥ ३६ ॥

सरोगमुपसेवितेऽप्यहह पूर्णचन्द्रोदये
ज्वरोपहतमम्बुजं तव परिग्रहादिन्दिरे।
विकासयति विज्वरं विरचयन्नसौ भास्करो
रवेररुजमाप्नुयादिति न पूर्वभाषा मृषा॥ ३७ ॥

कल्याणधर्मा कमलासनाया मूर्तिं हि यस्ते मतिमानुपास्ते।
कन्ये सुधाब्धेः कमलासनत्वं तस्योचितं तत्क्रतुनीतिभूम्ना॥ ३८ ॥

विच्छिन्नमब्दशतकव्यवधानतो यत्
सन्दर्शनं सहभुवः शशिनः कदाचित्।
तत्पद्मवासिनि तदीक्षणवर्जनाय
तस्योदयेषु निजसद्म किमावृणोषि॥ ३९ ॥

वारिजवनस्य भाग्यं वर्णयितुं नैव वयममी शक्ताः।
कमले तव स्थितौ यद्विकल्पितं वक्षसा समं विष्णोः॥ ४० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सद्मवैभवस्तबकः ॥